# पारिशिक्षाटीका याजुषभूषणम्

सिताभोजनिष्ठं रथाङ्गाब्जमुद्रास्
तथा पुस्तकं तं कराब्जैर्दधानम्
प्रणम्याश्ववक्त्रं त्वहं पञ्चवर्ण-
क्रमाणां निदानं प्रवक्ष्ये प्रबन्धम्

अथेष्टदेवताप्रणामानन्तरं स्वगुरोर्वेदतल्लक्षणाद्यभिज्ञताप्रकाशनमुखेन वस्तुनिर्देशात्मकं मङ्गलमातनुते । पदक्रमेति ॥

पदकिरमजटाघनध्वजरथादिभेदैर्युता
श्रुतिः प्रथितलक्षणा स्फुरितपञ्चवर्णक्रमा
यदीयवदनान्तरे वसतिमाप शास्त्रैः समं
समे विजयतेतरां प्रथितरामनामा गुरुः

अथ मङ्गलानन्तरं विविधवर्णक्रमादिलक्षणविचाररसिकानां विदुषां तत्तल्लक्षणसुखपरिज्ञानार्थं सांप्रतिकजनदुरवबोधभारद्वाजव्यासपारिशम्भुकौहलहारीतबोधायनवासिष्ठवाल्मीकिप्रभृतिमुनिगणविनिर्मितशिक्षादिग्रन्थानुसरेण ललितपदसंदर्भं किंचित्प्रबन्धं कर्तुमनाः स्वकीर्त्यनुवृत्तये स्वनामधेयं निबध्नन् शिष्यावधानाय प्रतिजानीते ।
तनय इति ॥

तनयो विनयोज्ज्वलस्य तस्य
प्रथितो वैदिकवावदूकसिंहः
कृपया महतां स चक्रनामा
ह्यपि वर्णक्रमलक्षणं करोति

तनय इत्यादि स्पष्टोऽर्थः

संप्रति स्वग्रन्थस्यामूलकताशङ्काप्रयुक्तानादरपरिहाराय समूलकतां प्रतिपादयन् शिष्यपरिग्रहस्य स्वस्य ग्रन्थस्य

चाभ्युदयसाधनतयैतद्ग्रन्थफलीभूतां शिष्टप्रीतिं प्रार्थयते ।
सतामिति ॥
सतां मुदं संप्रति पारिशिक्षाव्याख्यानभूता हृदयंगमेयम्
विलक्षणा यजुषभूषणाख्या कृतिर्मदीया वितनोतु कामम्

प्रणिपत्य जगन्नाथं वासुदेवं सनातनम्
गणाधिपं गिरां देवीं शिक्षां वक्ष्ये यथामति १

अन्तिमाः शलोकाः
केवलवर्णलक्षनिकत्वस्वरवर्णक्रमादीनां त्रयाणां लक्षणान्याह

शुद्धवर्णे त्वचामादौ यद्युच्चादिः प्रयुज्यते १३५
संविद्यात्स्वरवर्णं तदेतदेवास्य लक्षणम्

शुद्धवर्ण इति । शुद्धवर्णे केवलवर्णक्रमोक्तौ अचामकाराद्यौकारपर्यन्तानां स्वराणामादौ प्रथमत उच्चादिरुदात्तादिस्वरः प्रयुज्यते यदि तथा प्रयुक्तोदात्तादि स्वरविशिष्टवर्णं स्वरवर्णं संविद्यात् । स्वरवर्णक्रममिति सम्यग्ज्ञेयमित्यर्थः । अस्य स्वरवर्णक्रमस्यैतदेव लक्षणमेतावदेव लक्षणम्

वर्णे च स्वरमात्राङ्गवर्णसारेषु नित्यशः १३६
कारोत्तरस्वरेभ्योऽर्वाङ् न च संधिः कदाचन

उदात्तादिस्वरात् पूर्वं स्वरवर्णे च मातृका १३७
यदि युज्येत नाम्नासौ मातृका वर्ण उच्यते
तस्मिंस्तु मातृकात् पूर्वमचां संज्ञोच्यते यदि १३८
हलामादावङ्गसंज्ञा नामान्यस्याङ्गवर्णकः
यत्र यत्र व्यञ्जनानां पौर्वापर्यविधानतः १३९
यथाङ्गलक्षणं प्रोक्तमङ्गवर्णे तथा वदेत्
व्यञ्जनानामङ्गवर्णे त्वङ्गं भूतोत्तरं वदेत् १४०
हल्संज्ञिकेति कण्ठोक्त्या वदेत् तन्नाम वै ततः
आदौ स्वराणामच्संज्ञा तत्तन्मात्रा वदेत् ततः १४१
अथ स्वरानुदात्तादीन् तन्नाम च वदेत् क्रमात्
व्यञ्जनं यद्यवसितं तस्य मात्रा विधीयते १४२
यत्रानवसितं तत् स्यात् तन्मात्रा तत्र नेष्यते
अनेकवर्णसंयोगो यत्रैकव्यञ्जनात्मकः १४३
स्यात्पूर्वाङ्गो भवेत् तत्र पूर्वाङ्गादि सकृद् वदेत्
एकव्यञ्जनसंयोग उभयाङ्गो भवेद्यदि १४४
पृथगङ्गं प्रयुञ्जीयात् पौर्वापर्यक्रमात् तदा
यदुक्तं केवले वर्णे शास्त्राद् द्वित्वागमादिकम् १४५
तत् सर्वमङ्गवर्णोक्तौ प्रयुञ्जीयाद्यथाविधि १४६

पारि शिक्षा सयजुषभूषणा समाप्ता

Reference:
Yājuṣa Bhūṣaṇa, in Stautzebach, Ralf, *Pāriśikṣā und Sarvasaṁmataśikṣā: Rechtlautlehren der Taittirīya Śākhā*, Franz Steiner Verlag: Stuttgart,1994.